# Mrityunjaya Ashtakam 2

# મૃત્યુઞ્જયાષ્ટકમ્ ૨

## Document Information

Text title : Mrityunjaya Ashtakam 2

File name : mRRityunjayAShTakam2.itx

Category : shiva, aShTaka

Location : doc_shiva

Author : Krishnananda Saraswati

Proofread by : Rajesh Thyagarajan

Description/comments : Minor works of Shri Krishnananda Saraswati

Latest update : November 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 6, 2025

*sanskritdocuments.org*

# Mrityunjaya Ashtakam 2

# મૃત્યુઞ્જયાષ્ટકમ્ ૨

ભક્તૈકાન્તવશંવદેન ભવતેં સઙ્કુપ્યતા વેત્સિ ય-
ન્માર્કણ્ડેયમુપદ્રવન્પુરભિદા નિર્ભેત્સ્યસે વક્ષસિ ।
સ સ્વામી મમ શઙ્કરઃ શમન તે દર્પં વિનેતા પુનઃ
યન્મામન્તિમદુર્દશાગતમિવ પ્રત્યેષિ પર્યેષિ ચ ॥ ૧॥

અશ્રાન્તં પ્રભવાપ્યયક્રકચયોરશ્રાન્તરાપીડિતં
ભદ્રં ભાવિ જનુર્ભવિષ્યતિ પુનશ્શર્મેતિ ચિન્તાયતમ્ ।
પર્યાવૃત્તમિદં જગત્પરિમૃશન્ સંસારચક્રે ભૃશં
સન્ત્રસ્તશ્શરણાગતોઽસ્મ્યશરણો મૃત્યુઞ્જય ત્વામહમ્ ॥ ૨॥

યાવત્સૈરિભવાહનં સરભસાઽધિક્ષેપરૂક્ષાનનં
બદ્ધભ્રૂકુટિદુર્નિરીક્ષવિકટધ્વસ્તાક્ષમીક્ષે ત્રસન્ ।
તાવત્ત્વામકલઙ્કચન્દ્રસુભગસ્મેરાનનામ્ભોરુહં
પશ્યેયં વૃષભાધિરૂઢમુમયા સાનન્દમગ્રેસરમ્ ॥ ૩॥

કાયેષુ વ્યથમાનમર્મસુ કફે કણ્ઠોપરોધોદ્યતે
સીદદ્વૃત્તિષુ ચેન્દ્રિયેષુ મનસિ વ્યામોહમાસેદુષિ ।
પર્યસ્તે ભિષગુત્તમૈઃ પરિજને બાષ્પાકુલાક્ષે પરં
પશ્યેયં પરમેશ તે પદયુગં નાહં પરેતાધિપમ્ ॥ ૪॥

ભૈષજ્યાદ્ભિષજિ સ્થિતે પરિજને પર્યાકુલાક્ષે ભૃશં
ત્રુટ્યન્મર્મણિ વર્ષ્મણિ પ્રતિભયે કાલે સમાસીદતિ ।
ઉત્ક્રાન્તિશ્રમમુદ્ધ્રણં પ્રશમયન્નુત્તુઙ્ગસત્પુઙ્ગવો-
પારૂઢો જગદમ્બિકાસહચરઃ સ્યાન્મે પુરસ્તાન્મૃડઃ ॥ ૫॥

સંસીદત્યસુપિઞ્જરે ભયભરક્લાન્તાન્તરે જીવિતે
પ્રત્યાસીદતિ કાલકિઙ્કરગણે ચિત્તે મુહુર્મુહ્યતિ ।
અબ્રહ્મણ્યરવશ્રવા સહ દયાસારૈસ્સમાશ્વાસયન્
મા ભૈષીરિતિ મામુપૈતુ ભગવાનારાદુમાકામુકઃ ॥ ૬।

ક્રોધાવર્તિતલોચને કુટિલિતભ્રૂભઙ્ગરૌ દ્રાનને
સોલ્લુણ્ઠસ્ફુરિતાધરે સરભસં કાલે સમાસીદતિ ।
સન્ત્રાસવ્યથિતાન્તરસ્ય મમ સન્ત્રાણાય સન્નહ્યતે
શમ્ભો તે ત્રિપુરાન્તકાન્તક હરેત્યુજ્જૃમ્ભતાં કાહલી ॥ ૭॥

અન્વઞ્ચદ્દ્રુહિણાદિકાર્યનિયમવ્યાસઙ્ગભાજિ ત્વયિ
પ્રત્યાસન્નકૃતાન્ત કિઙ્કરભયક્લાન્તે નિતાન્તં મયિ ।
શ્રીમૃત્યુઞ્જય શઙ્કરાન્તકરિપો દેવેત્યુદારધ્વનિઃ
શમ્ભો તે જયકાહલી યમભટત્રાસાય સઞ્જાયતામ્ ॥ ૮॥

મત્ક્ષેમાય તવૌપવાહ્યવૃષભગ્રૈવેયઘણ્ટાધ્વના-
વારાદઞ્ચતિ વઞ્ચિતાન્તકભયઃ પ્રેક્ષેય સાક્ષાદહમ્ ।
વિત્રાસદ્રુતસૈરિભં વિનિપતદ્ભિભ્રાન્તસૈન્યાકુલં
વિસ્રસ્તાખિલશસ્ત્રમન્તકચમૂમન્વગ્યમં વિદ્રુતામ્ ॥ ૯॥

મર્માણિ વ્યથયન્તુ ગાઢકુપિતા નિસ્સન્ધિબન્ધાનિ મે
વ્યાકર્ષન્ત્વસુપઞ્જરં યમભટાઃ પાશૈર્દૃઢં પાશિતમ્ ।
સન્તામ્યન્તુ મમેન્દ્રિયાણિ સકલાન્યન્તે પરં તે વિભો
ચેતશ્ચુમ્બતુ કાલમાથિચરણં ત્વામમ્બિકાર્ધાસનમ્ ॥ ૧૦॥

નિત્યં યો નિયતઃ પઠત્યવહિતો મૃત્યુઞ્જયાખ્યસ્તવં
ધ્યાયન્નાત્મનિ સુપ્રસન્નવદનામ્ભોજૈ ભવાનીપતિમ્ ।
નિર્ધૂતાપમૃતિસ્સ જીવતિ ચિરાદન્તે ચ મૃત્યુઞ્જયં
સાક્ષાત્કૃત્ય મહીયતે શિવપદે નિશ્શોકમોહે સુખમ્ ॥ ૧૧॥

શ્રીરામભદ્રયોગીન્દ્રચરણામ્બુજરેણુના ।
કૃષ્ણાનન્દયતીન્દ્રેણ કૃતં મૃત્યુઞ્જયાષ્ટકમ્ ।

ઇતિ કૃષ્ણાનન્દકૃતિષુ મૃત્યુઞ્જયાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Rajesh Thyagarajan

*Mrityunjaya Ashtakam 2*

pdf was typeset on November 6, 2025

Please send corrections to *sanskrit@cheerful.com*